अङ्क-२४
जुलाई-दिसम्बर २०१४

वेदविद्या
ISSN-2230-8962

# वैदिकवाङ्मयस्य कालिदाससाहित्ये प्रभावः

**बाबूलालः मीना आचार्यः**

महाकविः कालिदासः संस्कृतसाहित्याकाशस्य देदीप्यमानः सूर्यः विद्यते। सः विश्वविख्यातः काव्यस्रष्टा, कविकुलगुरुः, सफलः महाकाव्यकारः, सर्वोत्कृष्टः नाटककारः, सर्वश्रेष्ठश्च गीतिकाव्यप्रणेता अस्ति। सः न केवलं संस्कृतवाङ्मयस्य अपितु सकलचेतनायाः साहित्यिकसमृद्धेः एकमात्रभूतो सर्वश्रेष्ठः प्रतिनिधिः महाकविः वर्तते। सः भारतीयायाः संस्कृतेः महान् व्याख्याता विद्यते। तस्य कविता साक्षात् त्रिवेणी अस्ति। तस्यां कवित्वस्य निर्मला धारा पवित्रायाः मन्दाकिन्याः धारा एव। तस्यां भावानां कल्पनानां च गम्भीरा धारा मनोज्ञायाः कालिन्द्याः एव धारा। तस्यां विविधकलानां ज्ञानानां, नवनवोन्मेषशालिनीप्रतिभाभूतायाः सरस्वत्याश्च शुभ्रधारा विद्यते। तस्य काव्ये स्वर्गीयः आनन्दः, भौतिको विलासः, दैवी दिव्यता, मानवीया मनोज्ञता सात्त्विकं सम्मोहनं च सन्ति। तस्य कथानकेषु सुविचारितं घटनासंयोजनमस्ति। तत्र बाह्यप्रकृतेः विश्लेषणेन सह अन्तःप्रकृतेः अपि सूक्ष्मं दर्शनं प्राप्यते। चरित्रचित्रणे वैयक्तिकतायाः प्राधान्यं विद्यते। शब्दचयने नीरक्षीरविवेको दृश्यते। तद्वर्णनेषु अलङ्कारप्राधान्यं नास्ति अपितु नैसर्गिकसुषमायाः प्रमुखता दरीदृश्यते।

वस्तुतः कालिदासे सर्वतोमुखी प्रतिभा विद्यते। तस्मिन् अद्भुतकवित्वशक्तेः नवनवोन्मेषः विद्यमानोऽस्ति। तस्य लोकप्रियतायाः मुख्यं कारणं सरला, परिष्कृता प्रसादगुणयुक्ता च शैली वर्तते। तस्यां प्राञ्जलता, मनोरमतायाः अकृत्रिमतायाः सङ्केतात्मकतायाः ध्वन्यात्मकतायाः आदर्शरूपतायाः सङ्गीतात्मकतायाश्च सुन्दरः समन्वयः विद्यते। तस्य वर्णनानि सजीवानि सन्ति। तेषु न तु पुराणादितुल्यः अनावश्यकः विस्तारोऽस्ति, न शैथिल्यं, न एव परिवर्तिभिः कविभिस्तुल्यं पाण्डित्यप्रदर्शनम्, न एव दीर्घसमासः, न अलङ्कारभारः, न च कृत्रिमकवित्वमस्ति अपितु तद्रचनासु कवित्वस्य प्रभावः दृग्गोचरीभवति। हृद्गतानां भावानां मूर्तरूपे प्रकटीकरणम्, मानवहृदयस्य सूक्ष्मतमानां क्रियाणां तात्त्विकं वर्णनम्, प्रकृतेः मानवहृदयेषु प्रभावः, सुकुमारभावानां कोमलायां भाषायाम् अभिव्यक्तिः इत्यादयः गुणाः कालिदासे प्राप्यन्ते। अतएव महाकविः कालिदासः सर्वान् कवीन् अतिशेते। सः सर्वेषु कविषु अद्वितीयः। एभिः कारणैरेव समीक्षकाः कथयन्ति-

**पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ॥**

महाकवेः कालिदासस्य रचनासु व्यक्तेन पाण्डित्येन ऋषीणाम् आश्रमाणां च वर्णनेन एतदनुमानं भवति यत् सः कुत्रचित् गुरुकुले एव शिक्षां गृहीतवान्। तत्रैव स अवश्यमेव संहितानां, ब्राह्मणोपनिषदां,

स्मृतीनां, दर्शनानां, धर्मशास्त्रस्य, व्याकरणशास्त्रस्य, पुराणानां, राजनीतिशास्त्रस्य, इतिहासस्य, काव्यशास्त्रस्य, चित्रकलायाः, सङ्गीतकलायाः, आयुर्वेदस्य, ज्योतिषशास्त्रस्य, सामुद्रिकशास्त्रस्य, कामशास्त्रस्य, मनोविज्ञानस्य, युद्धविज्ञानस्य, वनस्पतिविज्ञानस्य, पक्षिविज्ञानस्य च इत्यादीनां शास्त्राणां विस्तृतमध्ययनं कृतवान्, तथापि सोऽभिमानशून्यः आसीत्-

**क्व सूर्यप्रभवो वंशः ? क्व चाल्पविषया मतिः?**
**तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥**[१]

महाकविः कालिदासः उपर्युक्तानां विद्यानां कलानां च पूर्णावगाहनेन सह अनेकानां देशदेशान्तराणां भ्रमणमपि कृतवान्। सः निश्चयेन बहिर्जगतः सूक्ष्मनिरीक्षणेन सह अन्तर्जगतोऽपि सूक्ष्ममाकलनमकरोत्। सः शास्त्रनियमानां स्वरचनासु कुत्रचिदपि न उल्लङ्घितवान्। वस्तुतः सर्वाः भारतीयाः विद्याः वेदेभ्यः उद्भूताः। कालिदाससाहित्यस्यापि उपजीव्याः वेदाः एव; अत एव तस्य साहित्ये वैदिकवाङ्मयस्य अनुपमः अद्भुतश्च प्रभावः परिलक्ष्यते। तस्य वैदिकवाङ्मयस्य ज्ञानस्य सूचकानि स्थलानि तत्कृतिषु बहूनि सन्ति, तेषां सङ्केतसन्दर्भानां शोधलेखगौरवात् सङ्क्षेपेण केवलं दिग्दर्शनमत्र प्रस्तूयते। वस्तुतः ऋषयः शास्त्रकाराः कविगणाश्च स्वावश्यकतानुसारं ज्ञानराशिभूतानां वेदानां ज्ञानस्य स्वग्रन्थेषु प्रयोगं कुर्वन्ति, अत एव राजशेखरेण एका प्राचीना उक्तिः उद्धृता -

**नमोऽस्तु तस्यै श्रुतये यां दुहन्ति पदे पदे। ऋषयः शास्त्रकाराश्च कवयश्च यथामति ॥**[२]

महाकविः कालिदासः वैदिकवाङ्मयस्य उल्लेखं पावित्र्य-माङ्गल्य-प्रामाण्यादीनां भावनानां जागरणाय काव्यनाटकेषु अनेकस्थलेषु कृतवान्, येन महाकवेः कालिदासस्य विस्तृतं वेदाध्ययनं ज्ञायते। वस्तुतः महाकविः कालिदासः वैदिकधर्मस्य अनुयायी आसीत्। सः श्रुतिसम्मतायां वर्णाश्रमव्यवस्थायां विश्वसिति। ऋग्वैदिकस्य वर्णव्यवस्थायाः '**ब्राह्मणोऽस्य मुखमासीद्०**..........।[३] प्रभावः कालिदास्य सर्वत्र स्वग्रन्थेषु दरीदृश्यते; यथा -

**नृपस्य वर्णाश्रमपालनं यत् स एव धर्मो मनुना प्रणीतः।**
**निर्वासिताऽप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीयाः॥**[४]

पतिगृहगमनावसरे ऋषिणा कण्वेन शकुन्तलायै प्रदत्त उपदेशः- शुश्रूषस्व०.......।[५] पूर्णतया ऋग्वेदस्य '**गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि**[६] मन्त्रेण प्रभावितः। सः

---

[१] रघुवंशम्, १/२
[२] काव्यमीमांसा, सप्तमः अध्यायः
[३] ऋग्वेदः, पुरुषसूक्तम्, १०/९०/१२
[४] रघुवंशम्, १४/६७
[५] अ.शा., ४/१८
[६] ऋग्वेदः, १०/८५/२६

पुरुषार्थचतुष्टयं स्वीकरोति। तद्दृष्ट्या मोक्षः परमः पुरुषार्थः। त्रिवर्गे धर्मः सर्वोत्कृष्टः। धर्मविरोधरहितौ अर्थकामौ तत्प्रियौ स्तः। सः संसारजनेभ्यः त्यागं तपस्यां च शिक्षयति। महाकविः कालिदासः वेदसम्मतस्य यज्ञस्य प्रबलः समर्थकः। रघुवंशे अश्वमेधादियज्ञानां वर्णनं प्राप्यते।[७] यजुर्वेदस्य अश्वमेधयज्ञस्य मालविकाग्निमित्रेऽपि उल्लेखो प्राप्यते। राज्ञः दिलीपस्य पत्नी सुदक्षिणा यज्ञस्य दक्षिणेवासीत्-पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।[८] अस्याः कल्पनायाः स्रोतः **'यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः०'** ब्राह्मणवाक्यं वर्तते। महाकविः दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता।[९] इत्यनेन यज्ञविधिं समर्थयति। यज्ञसाफल्यार्थं श्रद्धायाः वित्तस्य विधेश्च समन्वयः आवश्यकः, अत एव कथयति प्रकारान्तरेण महाकविः कालिदासः -

**दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्। श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम्।**[१०]

सः वैदिककर्मकाण्डस्य समर्थकः। बौद्धधर्मस्य विरोधेऽपि कदापि वैदिककर्मकाण्डस्य परित्यागः न करणीयः -

**सहजं किल यद् विनिन्दितं न खलु तत्कर्म विवर्जनीयम् ।**
**पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः ॥**[११]

तव भवतु विडौजाः प्राज्यवृष्टिः प्रजासु त्वमपि विततयज्ञो वज्रिणं प्रीणयस्व।[१२] सायन्तने सवनकर्मणि[१३] अग्निशरणं प्रविष्टस्य[१४] इत्यादिकं कालिदासस्य वर्णने **'यज्ञो वै श्रेष्ठतमं कर्म'**[१५] इति शतपथब्राह्मणस्य याज्ञिकस्य कर्मकाण्डस्य स्पष्टः प्रभावो दृश्यते। श्रुतिकल्पनायामाधारिता उपमा रघुवंशे दृश्यते।[१६] नन्दिन्याः मार्गे दिलीपस्य राज्ञः पत्नी सुदक्षिणा तथैव चलतिस्म यथा श्रुतिं स्मृतिः अनुसरति-

**तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया।**

---

[७] रघुवंशम्, ४/८६, ५/१
[८] रघुवंशम्, १/३१
[९] अ.शा., चतुर्थः अङ्कः
[१०] अ.शा., ७/२९
[११] अ.शा., ६/१
[१२] अ.शा., ७/३४
[१३] अ.शा., ३/२४
[१४] अ.शा., चतुर्थः अङ्कः
[१५] शतपथब्राह्मणम्, १.७.३.५
[१६] रघुवंशम्, ४/१

**मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।।**[१७]

महर्षिः मनुः सर्वेषु नृपेषु तथैव प्रथमोऽऽसीत् यथैव वेदमन्त्रेषु ओङ्कारः प्रथमः भवति- **आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।**[१८] महाकविः वैदिकछन्दःसु अपि पद्यनिर्मातुं समर्थः-**अमी वेदिं परितः०......।**[१९] इत्यनेन प्रकटितं यत् सः वैदिकछन्दःशास्त्रस्य ज्ञाता आसीत्। ऋग्वेदस्य तदुदात्तादिस्वराणाम् उल्लेखाः अपि तद्रचनासु प्राप्यन्ते।[२०] वेदमूलकाः उपनिषदः। उपनिषदाश्रितायाः श्रीमद्भगवद्गीतायाः प्रभावः कुमारसम्भवे दृश्यते।[२१] श्रीमद्भगवद्गीतायाः **'देवान् भावयतानेन ते देवा भावयन्तु वः'**[२२] श्लोकस्य भावान् पुनरावृत्तिं कुर्वन् यज्ञविधिं समर्थयति-

**तव भवतु विडौजाः प्राज्यवृष्टिः प्रजासु.... श्लाघनीयैः।**[२३]

वेदेषु स्पष्टतया पुनर्जन्मसिद्धान्तो दृश्यते।[२४] कालिदासोऽपि स्थाने स्थाने स्वग्रन्थेषु पुनर्जन्मनः सिद्धान्तं परिपोषयति।[२५] निरुक्ते कथितम्-यत् **विद्या ह ब्राह्मणमाजगाम।**[२६] अयमेव भावः महाकविना कालिदासेन **'सुशिष्यपरिदत्ता विद्येवाशोचनीयासि संवृत्ता'**[२७] इत्यत्र दृश्यते। यजुर्वेदसम्मतः[२८] नामकरणसंस्कारः रघुवंशे रघोः नामकरणे दृश्यते।[२९] एवमेव अन्येषाम् अपि जातकर्मादीनां संस्काराणां विवरणं प्राप्यते।[३०] कुमारसम्भवे शिवपार्वत्योः रघुवंशे च अज-इन्दुमत्योः विवाहवर्णनं गृह्यसूत्राधारितमेव। विवाहोपरान्ते दम्पती रात्रित्रयपर्यन्तमेव ब्रह्मचर्यपालनं भूमिशयनं च कुर्याताम्- अस्य गृह्यसूत्रस्य नियमस्य[३१] पालनं भगवान् शङ्करः कृतवान्-ईदृशं वर्णनं कुमारसम्भवे[३२] दृश्यते।

[१७] रघुवंशम्, २/२
[१८] रघुवंशम्, १/११
[१९] अ.शा., ४/८
[२०] कुमारसम्भवम्, २/१२, रघुवंशम्, १५/७६
[२१] कुमारसम्भवम्, ३/४८, ५०, ६/७७
[२२] श्रीमद्भगवद्गीता, ३/११
[२३] अ.शा., ७/३४
[२४] ऋग्वेदः, १/१६४/३, यजुर्वेदः १९/४६
[२५] अ.शा., ५/२, रघुवंशम्, १४/६६
[२६] निरुक्तम्, २/४
[२७] अ.शा., चतुर्थः अङ्कः
[२८] यजुर्वेदः ६/२९
[२९] रघुवंशम्, ३/२१
[३०] रघुवंशम्, ३/१८, १०, २८, २९; ८/७१, ७२; १२/५६; १९/५४
[३१] आश्वलायनगृह्यसूत्रम्, १/१४/५-६
[३२] कुमारसम्भवम्, ७/९४

आश्वलायनगृह्यसूत्रानुसारमेव शिवस्य मन्त्रपाठैः सह मधुमिश्रितस्य दध्नः नववस्त्रग्रहणस्य च वर्णनं महाकविना विवाहवर्णनप्रसङ्गे[३३] कृतम्। परमात्मनः आदिसृष्टिः जलरूपा सृष्टिः वर्तते। अस्याः उल्लेखः ऋग्वेदस्य **नासदीयसूक्ते** विद्यते।[३४] तैत्तिरीयब्राह्मणेऽपि इदमेव कथितम्- **आपो वा इदमग्रे सलिलम्।** शतपथब्राह्मणमपि इदमेव वक्ति।[३५] कालिदासेऽपि वैदिकवाङ्मयस्यास्य प्रभावः स्पष्टत्वेन दृष्टिगोचरो भवति- **या सृष्टिः स्रष्टुराद्या०।**[३६]

**अग्निसूक्ते** अग्निः यज्ञस्य पुरोहितः, देवः, ऋत्विक्, होता च कथितः।[३७] शिवस्य अग्निस्वरूपा मूर्तिः विधिना हुतं हविः देवान् प्रापयति- **'वहति विधिहुतं या हविः**[३८]; भगवतः शिवस्य **'या सृष्टिः स्रष्टुराद्या'** इति अनेकरूपतायाः वर्णनं ऋग्वेदस्य ईश्वरस्य **'एकं सद् विप्रा बहुधा वदन्ति'**[३९] इति अनेकरूपतया प्रभावितं वर्तते। वस्तुतः कालिदासः कुमारसम्भवे ब्रह्मणः शिवस्य च, रघुवंशे च विष्णोः स्तुतिं कृतवान्। अनेन सः एकेश्वरवादं स्वीकरोति। कालिदासः विक्रमोर्वशीयस्य त्रोटकस्य संविधानकस्य प्रेरणां ऋग्वेदतः[४०] शतपथब्राह्मणतः[४१] च प्राप्तवान्। उपनिषदां मनुस्मृतेश्च प्रभावः कुमारसम्भवे दृश्यते।[४२] उपनिषदि श्रेयसः प्रेयसश्च वर्णनं प्राप्यते।[४३] कालिदासः अपि श्रेयसः प्रेयसश्च पक्षपाती आसीत्। सः यत्र मेघदूते लिखति-

**विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।**[४४]

तत्रैव श्रेयसोऽपि तावती महत्ता जीवनाय-**प्रजायै गृहमेधिनाम्**[४५]; **योगेनान्ते तनुत्यजाम्**[४६] श्रेयसः प्रेयसः एकत्र मेलनमपि द्रष्टव्यमस्ति-

---

[३३] कुमारसम्भवम्, ७/७२
[३४] ऋग्वेदः, १/१२९/१
[३५] शतपथब्राह्मणम्, ११/१/६/१
[३६] अ.शा., १/१
[३७] ऋग्वेदः, १/१/१
[३८] अ.शा., १/१
[३९] ऋग्वेदः, १/१६४/४६
[४०] ऋग्वेदः, १०/९५
[४१] शतपथब्राह्मणम्, ५/१-२
[४२] कुमारसम्भवम्, २/५, ७
[४३] कठोपनिषद्, प्रथमाध्यायः
[४४] मेघदूतम्, पूर्वार्द्धे,
[४५] रघुवंशम्, १/७
[४६] रघुवंशम्, १/८

**वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलु कृती।**[४७]

दुष्यन्तः शकुन्तलायाः रूपसौन्दर्यमुपभोक्तुमिच्छति। प्रेयसि तस्य अतीव अनुरागः किन्तु श्रेयः अपि तावत् अपरिहार्यम्। प्रेयसः अपेक्षया तद्दृष्टौ श्रेयः अधिकम् अत एव तत्त्वान्वेषणात्पूर्वं सः शकुन्तलां न स्वीकरोति। कालिदासः श्रेयसात्मकं प्रेयोऽपि अङ्गीकरोति -

**भ्रमर इव विभाते कुन्दमन्तः तुषारं न च खद्द परिभोक्तुं नैव शक्नोमि हातुम्।।**[४८]

इत्यत्र विचारणीयः भावः। उपर्युक्तेन सङ्क्षिप्तेन विवेचनेन ज्ञायते यत् महाकवेः कालिदासस्य श्रुतिविषयकस्य वैदिकवाङ्मयस्य वा ज्ञानं विलक्षणम् आसीत्। सः वैदिक्याः वर्णव्यवस्थायाः आश्रमव्यवस्थायाश्च समर्थकः पोषकश्च आसीत्। तस्य आदर्शपात्राणि श्रुतिनियमान् पालयन्ति। वस्तुतः महाकविः स्वकवितामाध्यमेन निश्चितमेव वेदानामुद्गायकः, संरक्षकः, व्याख्याकारः प्रचारकश्चासीत्। वेदाः तस्य काव्यानामुपजीव्याः-अत्र नास्ति सन्देहः। सङ्क्षेपेण एतत् स्पष्टं भवति यत् वैदिकवाङ्मयस्य कालिदाससाहित्ये अनुपमः अद्भुतश्च प्रभाव आसीत्।

**बाबूलालः मीना आचार्यः**
संस्कृत-विभागः
एम.एस.जे.राजकीयःस्नातकोत्तरःमहाविद्यालयः
भरतपुरम् (राजस्थानम्) पिन-३२१००१

[४७] अ.शा., १/२४
[४८] अ.शा., ५/१९